**Total No, of questions : - 5** **Tota No. of pages : 2**

**Code No. UT-03**

# स्नातकोत्तरपरीक्षाः–२०१५

## एम्.ए–विद्वदुत्तमा–प्रथमवर्षः

पत्रिका–३

## विषयः–सलोचनध्वन्यालोकः

दिनाङ्कः –27-03-2015 गरिष्ठाङ्काः – ८०

समयः – 10.00 A.M to 1.00 P.M] Max. Marks - 80

---

**I. संक्षिप्तमुत्तरं लिखत –** **10x1=10**

१. ध्वन्यालोकस्य लोचनमिति व्याख्यानं केन कृतम्?

२. भम धम्मिअ ! वीसत्थो सो सुणओ अज्ज मारिओ देण – अस्य छाया का?

३. महाकवीनां सरस्वती अलोकसामान्यं कमभिव्यनक्ति?

४. भक्त्या ध्वनिः न लक्ष्यते – किमर्थम्?

५. अविवक्षितवाच्यस्य ध्वनेः वाच्यं कथं द्विविधम्?

६. रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि – तत्र ध्वनेः कः प्रभेदः?

७. अङ्गाश्रिता अलङ्काराः किंवत् मन्तव्याः?

८. श्रुतिदुष्टादयो दोषाः कस्मिन् रसे हेया इत्युदाहृताः?

९. मरणं च जलदभुजगं प्रसह्य कुरुते विषं वियोगिनीनाम् – अत्र विषशब्दस्य अर्थद्वयं किम्?

१०. सन्निहितबालान्धकारापि भास्वन्मूर्तिः' इत्यत्र कोऽलङ्कारः?

**II. वाक्यत्रयं सप्रसङ्गं व्याख्यात –** **3x5=15**

१. स हि कदाचित् वाच्ये विधिरूपे प्रतिषेधरूपः ।

२. अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्यामनन्ति ।

३. ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति ।

४. तद्व्यक्तिहेतू शब्दार्थावाश्रित्यौजो व्यवस्थितम् ।

६. विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन ।

**III. त्रीन् प्रश्नान् उत्तरयत –** **3X10=30**

१. स्वेच्छाकेसरिण इति मङ्गलपद्यं विलिख्य व्याख्यात ।

२. भाक्तमाहुस्तमन्ये – आशयं विशदीकृत्य निराकुरुत ।

३. प्रतीयमानं पुनरन्यदेव इति कारिकां विलिख्य तदाशयं विवृणुत ।

४. ध्वनिकाव्यस्य लक्षणं किम्? सदलकृत्यं विवेचयत ।

५. शब्दशक्त्युद्भवो नाम ध्वनिः कः? सलक्षणोदाहरणं निरूपयत ।

**IV. पद्यत्रयं सप्रसङ्गं व्याख्याय तत्रत्यं विशेषं सयुक्तिकमाविष्कुरुत –** **3X5=15**

१. अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥

२. शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः ।
सुमुखि! येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः ॥

३. सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥
४. दैवायत्ते फले किं क्रियतामेतावत्पुनर्भणामः ।
रक्ताशोकपल्लवाः पल्लवानामन्येषां न सदृशाः ॥

**V. कारिकाद्वयं सप्रसङ्गं व्याख्याय तात्पर्यं लिखत –** **2x5=10**

१. योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः ।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥
२. शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते ।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम् ॥
३. काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥
४. रसाक्षिप्ततया बन्धो यस्य शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वर्त्यः सालङ्कारो ध्वनौ मतः ॥

—+०*०+—